CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.J.P.B.

Coll. No. 550

Title Kāśikā vṛitt

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 550 Subject: Grammar

Title: kāśikā vritti

Author: Vāmana Scribe:

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.2' Extent: 10 folli

Language: Sanskrit. Script: Devanagari

Remarks: —

ॐ नमो गणेशाय ॥ पाणिनये नमः ॥ नत्वा भाष्यतथ्यान् तु नाम पर्यायणो दिघुविप्रकीर्णं तंत्र
स्य प्रक्रियया स्मारसंग्रहः ॥१॥ इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था । व्युत्पन्नस्य
सिद्धिविवृतिरियं कौशिका नाम ॥२॥ व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमिता वत्
। शिष्टः परिकरबंधः क्रियतेऽस्य ग्रंथकारेण ॥ अथ शब्दानुशासनं । केषां शब्दानां लौकिकानां वैदि
कानां च रूपमनुशासनं प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन च ॥ अथ किमर्थो व
र्णानामुपदेशः प्रत्याहारग्रहणार्थः प्रत्याहारो णाद्यैः न शास्त्रप्रवृत्त्यर्थः अइउण् सूत्रेणानेनक्रमे
ण वर्णानुपदिश्य पते । णकारमितं करोति प्रत्याहारार्थं ग्रहणं भवति केना उरणरपर इत्यकारे
ण ह्रस्वमवर्णं प्रयोगे संवृतं । दीर्घप्लुतयोस्तु विवृतत्वं तेषां सावर्ण्यसिद्ध्यर्थं अकार इह शास्त्रे
विवृतः प्रतिज्ञायते तस्य प्रयोगार्थं अ अ इति शास्त्रांते प्रत्यापत्तिः करिष्यते स्वरूपाद्धि अच्युतस्य पुनस्त
स्यापत्तिः प्रत्यापत्तिः ऋ लृ क् ॥ तृ इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते ककारमितं करोति प्रत्याहारार्थं त
स्य ग्रहणं भवति ॥ किं ॥ अकः सवर्णे दीर्घः इत्यकारेण इको गुणवृद्धी तीकारेण । उगिदचां सु
कारेण ॥ अकारादयो वर्णाः प्रचुरप्रयोगविषयाः । तेषां तु ज्ञानमुपदेशप्रयोजनं । ऋकारस्तु

काशिका ९ ऌपिस्य एव प्रयुज्यते। क्लृपेश्च। पूर्वत्रासिद्धमिति लत्वमसिद्धं। तत्र ऌकार एवा
च्कार्याणि न भविष्यंतीति किमर्थमृकार उपदिश्यते। लत्वविधानात् यानि पराण्यच्
कार्याणि तानि तत्कारे यथा स्युरिति कानि पुनस्तानि। ऌतः स्वरितो द्विर्वचनं च। क्लृप्त
शिखः। प्रक्लृप्तः। प्लुक्लृप्तवान् इति यदृच्छाशक्तिजमसाधुरूपं तदनुकरणस्यापि साधु
त्वमिष्यते। तच्छब्दस्यापि लृकारस्याच्कार्यप्रतिपत्त्यर्थमुपदेशः क्रियते। ऌतक इति
प्रयोक्तव्ये शक्तिवैकल्यात् कुमार्या ऌतक इति प्रयुक्तं तमन्यो नुकरोति कुमार्यृत
क इत्याह। एओङ्। एओ इत्येतौ वर्णावुपदिश्यांते ङकारमितं करोति। प्रत्याहारा
र्थं तस्य ग्रहणं भवत्येकेन। एङि पररूपमित्येकारेण। ऐऔच्। ऐऔ इत्येतौ वर्णावु
पदिश्य पूर्वांश्चांते चकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति चतुर्भिः। अचंरासि ९

न्यपूर्वविधावित्येकारेण। इच एकाचोम्प्रत्ययवच्चेतीकारेण। एचोऽयवायाव इत्येकारेण। वृद्धिरादैजित्यैकारे
ण प्रत्याहारेष्वनुबंधानां कथमग्रहणं पुनः। आचारादप्रधानत्वात्। लोपश्च बलवत्तरः। वर्णेषु ये वर्णैक
देशा वर्णांतरसमानाकृतयस्तेषु तत्कार्यं न भवति। तद्यथा नुकारे लहितेन पुनस्ताए वा। पृथक्प्र
यत्ननिर्वर्त्यं हि वर्णमिच्छंत्याचार्याः। वृद्धिर्धिलादेश विनामेषु तु ऋकारे प्रतिविधातव्यं। वृद्धिर्धौ
ऋकारग्रहणं। आर्नियतुः। मानधुः। लादेशे ऌकारग्रहणं। क्लृप्तवान् विनामे ऋकारग्रह प्रक्लृप्तः प्र
णं कर्तृणं। हयवरट्। हयवर इत्येतान्वर्णानुपदिश्य पूर्वांताश्चांते टकारमितं करोति। प्रत्या
म्रा हारार्थं तस्य ग्रहणं भवत्येकेन। शश्छोटीत्यकारेण। अपरे फोयकारात्पर उपदिश्यते। तस्य पर
ग्रहणे न यथा ग्रहणे न च ग्रहणे सति स्वर्नयतीत्यत्र य रोऽनुनासिकेऽनुनासिको वेत्यनु
तिमातर्नीपर त्रा नासिकः प्राप्नोति। मद्रह्रदो मद्रह्रद इत्यत्र अचो रहाभ्यां द्वे इति द्विर्वचनं प्राप्नोति कंडूर ये
नवनं रथेन इत्यात्रानुस्वारस्य ययि परसवर्ण इति परसवर्णः प्राप्नोति। नैष दोषः। आक

अनेन२ नेर

स्थानमात्रेण गुणमात्रेण वा तरतमा।

का॰ श्रा॰ १ पा॰ १ वा

२ तोपरार्थं समुदाये सकृत्स्वे त्वमाणं प्रवर्तते इति दर्शने यरो नुनासिके नुनासिकौ तरतमो भवती
ति एवमेतत्प्रवर्तते तदनेन। गकारादीनां ङकारादयो यथास्वं स्थानतो गुणतश्चांतरतमा
स्ते सर्वे विहिता येतु न स्थानतो नापि गुणतस्ते सर्वे निवर्त्तिता इति स्थानमात्रां तरतमो रेफस्य
णकारो न भवति द्विर्वचने पि रेफस्य यरंतर्भावे सति यत्कार्यं प्राप्तं तत्साद्यात् सिद्धेन निमि
त्तभावेन बाध्यते। इति द्विरुच्यते रेफः। अनुस्वारस्य ययि परसवर्णं इत्येतैद्यनुस्वारांतरतमं द्व
सकृदेव परसवर्णं विदधाति। न च रेफस्यानुस्वारांतरतमः सवर्णोस्तीति न भविष्यति। कुं
वनं रथेन डुरथेन। … त्राटो मध्ये विसर्जनीय जिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्त्तव्यः। किं प
प्रयोजनं। ऊरः केण ऊरः केण उरःष्येण ऊरः पेण इत्येवं द्वावपीति णत्वं यथा स्यादिति त्रा
णत्वम्लन इत्येकं वर्णमुपदिश्य पूर्वाभ्यां तेणकारमितं करोति। प्रत्याहारार्थं तस्य ग्रहणं भव
ति त्रिभिः। अ इ उ दित्सवर्णस्य चाप्रत्यय इत्यकारेण। इणः को इति ईकारेण। इको यणचीति यका २

य॰४

प्यते। सय्यंता संयंता स्वः। यल्लोकं। तल्लोकमित्यत्रानुस्वारस्यानुनासिके ययि परसवर्णे कृते पमातेन सय्य ग्रहणेन ग्रहणं त॰२

प॰१ मेवे नु॰१ णकारेण॰१

रेण। इण्ग्रहणानि सर्वाणि रेफेणकारेण। अण् परग्रहणानि पूर्वेणाण् उदित्सवर्णस्य चाप्रत्यय
इत्येतदेकमनेनाथ किमर्थमण्ग्रहणमेवेतन्न क्रियते। नेवंशक्यं तस्य नामपि हि सवर्ण
नो ग्रहणं स्यात्। द्विर्वचनं यथा स्यादिति। हकारादिषु अकार उच्चारणार्थो नानुबंधः। अकारे तु अनु
४३ नासिक इत्येतत्कः प्रतिज्ञायते। तेन … रपर इत्यत्र प्रत्याहारग्रहणं त। वपरत्वमपि भव
ति। … अमङणनम्। अमङणन इत्येतान् वर्णान् उपदिश्य पूर्वाभ्यां तेमकारमितं करोति प्रत्या
हारार्थं तस्य ग्रहणं भवति त्रिभिः। पुमः खय्यम्परे इत्यकारेण। हलो यमां यमि लोप इति यका म
रेण। ङमो ह्रस्वादचि ङमुण्नित्यमिति ङकारेण। अमं ताङ् इति अकारेणापि ग्रहणमस्य दृश्यते
केचित्तु सर्वाण्येवैतानि प्रत्याहारग्रहणानि मकारेण भवंतीति मकारमनुबंधं प्रत्याचक्षते।
तथा नुस्वतिङमो ह्रस्वादचि ङमुण्नित्यमित्यत्रागमिनो ङमोरभावादागमाभावप्रतिपत्तौ प्रति
पत्तिगौरवं स्यात्। ॥ झभञ् … इत्येतौ वर्णावुपदिश्य पूर्वाभ्यां तेञकारमितं करोति। प्र

॥८॥

६ ता हारार्थं तस्य ग्रहणं भवत्येकेन। अतो दीर्घो यञीति यकारेण॥ ॥घढधष्॥ १५ घढध इत्येतान्व
र्णाननुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति। झभ्यां एकाचो बशो भ
ष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्यां॥ ॥जबगडदश्॥ जबगडद इत्येतान् वर्णाननुपदि
श्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः। भो भगो अघो अ
पूर्वस्य योऽशि यकारेण। हशि चेति हकारेण। नेड्वशि कृति वकारेण। झलां जश् झशि जका
रझकाराभ्यां। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति च बकारेण॥ ॥खफछठथचटतव्॥ खफ
छठथचटत इत्येतान्वर्णाननुपदिश्य पूर्वांश्चान्ते वकारमितं करोति। प्रत्याहारार्थं तस्य ग्रहणं
भवत्येकेन नश्छव्यप्रशानिति छकारेण खफग्रहणं मुक्तार्थं॥ ॥कपय्॥ कप इत्येतौ वर्णौ
नुपदिश्य पूर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति। चतुर्भिः अनुस्वारस्य
ययि परसवर्णः इति यकारेण। मय उञो वो वेति मकारेण। झयो होऽन्यतरस्यामिति झकारेण। पुमः

खय्यमपरे इति खकारेण॥ ॥शषसर्॥ १६ शषस इत्येतान् वर्णाननुपदिश्य पूर्वांश्चान्ते रेफमितं करो
ति प्रत्याहारार्थं तस्य ग्रहणं भवति। पंचभिः। यरोऽनुनासिकेऽनुनासिको वेति यकारेण। झरो झरि स
वर्णे इति झकारेण। खरि चेति खकारेण। अभ्यासे चर्च्चेति चकारेण। शर्पूर्वाः खय इति शकारेण॥
॥१४॥ हल्॥ ह इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते लकारमितं करोति। प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः
अलोऽन्त्यात्पूर्व उपधेत्यकारेण। हलोऽनन्तराः संयोग इति हकारेण। लोपो व्योर्वलीति वकारेण। र
लो व्युपधाद्धलादेः संश्चेति रेफेण। झलो झलीति झकारेण। शल इगुपधादनिटः क्स इति श
कारेण। अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते। कित्वक्सेट् विधयो यथा स्युरिति। स्नि
हित्वा स्नेहित्वा इत्यत्र रलो व्युपधाद्धलादेः संश्चेति कित्वं यथा स्यात्। लिहेः अलिक्षदिति। श हे ३
ल इगुपधादनिटः क्स इति क्सो यथा स्यात्। रुदिहि। स्वपिहि। वलादिलक्षण इट् यथा स्यात्। अ
दाग्ध्यां। झलां जश्ग्रहणेषु च हकारस्य ग्रहणं यथा स्यात्। यद्येवं हयवरट् इत्यत्र तर्हि किमर्थमुपदि

उत्वंयथास्यात्.२

का.अ.१पा.१ वा.श.१ मद्दी.५ घ.२

४ इष्यते। अइउण्सूत्रे हस्तेषु चादृग्रहणं यथास्यात्। हशिचेति हकार [illegible] ग्रहणं यथास्यात्। महान्
हिसः सिंहः। देवो हसति। आलणो लसति। एकस्मात् ङञणवटोभ्यांशस्त्रिभ्यएवकणमास्पुः। ज्ञेयौ
चयौ चतुर्भ्योरः पंचभ्यः शलौ षड्भ्यः॥ ॥ इति प्रत्याहारः समाप्तः॥१५॥ वृद्धिरादैच्॥१॥
वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानां अतद्भावितानां
च तपरकरणमैजर्थं तादपि परस्तपर इति तेन वृद्धैः स्वदैर्घ्ये कादिषु त्रिमात्रचतुर्मात्रसंग ले
निवृत्तये। आश्वलायनः। ऐतिकायनः। औपगवः। औपटवः। औपमन्यवः। शालीयः। मालीयः।
वृद्धिप्रदेशाः। सिचि वृद्धिः परस्मैपदेषु मृजेर्वृद्धिः वृद्धिर्यस्याचामादिस्तद्वृद्धमित्येवमादयः॥१॥
३ अदेङ्गुणः। गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकं अदेङां वर्णानां सामान्येन तद्भावितानाम्
अतद्भावितानां च। तपरकरणं लिङ्सर्वार्थं। तरिता। चेता। स्तोता। पचंति। पचंतः। पचे ति। गुण पठंति
प्रदेशाः। मिदेर्गुणः। गुणो यङ्लुकोः। गुणोपधेकेषु इत्येवमादयः॥ ॥ इको गुणवृद्धी। परिभाषेयं

४

स्थानिनियमार्था। अनियमप्रसंगे नियमो विधीयते। वृद्धिगुणौ स्वसंज्ञया शिष्यमाणौ इक एव स्थाने
भवत इति वेदितव्यौ वक्ष्यति। सार्वधातुकार्धधातुकयोः अंगस्य गुण इति। स इक एव स्थाने वेदित
व्यः। नान्यस्य। तरति। नयति। भवति। वृद्धिः खल्वपि। अकार्षीत्। अहार्षीत्। इक इति किं। आ संध्य
क्षर [illegible] व्यंजनानां मा भूत्। यानं ग्लायति। उं भिता। पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नि
यमार्थं इह मा भूत्। द्यौः पंथाः सः इममिति।३॥ न धातुलोप आर्धधातुके। धात्वेकदेशो धातुः
तस्य लोपो यस्मिन्नार्धधातुके तदार्धधातुकं धातुलोपं तन्निमित्ते ये गुणवृद्धी प्राप्नुतः। तेन भवतः
लोलुवः। पोपुवः। मरीमृजः। मरीमृजः। ममृजः। लोलूय। दिभ्यो यङ् तेभ्यः पचाद्यच् विहिते
यङोचि च इति यङ्लुकि कृते तमेवाच माश्रित्य ये गुणवृद्धी प्राप्नुतस्तयोः प्रतिषेधः। धातु ग्रहणं
३१ किं। लूञ् लविता। रेङ् सिपर्ण नयेत्। अनुबंधप्रत्ययलोपे मा भूत्। रिषोर्हिंसार्थस्य विच्प्रत्यय
लोपे उदाहरणं। रेडिति। आर्धधातुक इति किं। त्रिधा बद्धो वृषभो रोरवीति। आर्धधातुके मा

के.२ रो.१ सार्व.१

का॰ आ॰ १।५।१
मृड। [redacted] इकइत्येव। आभाजि रागः। एकनिमित्त लोपयतिचेष्टिति। क्लितिर्तौनि
५ मित्तसप्तम्येषां क्तिति निमित्ते येगुणवृद्धी प्राप्नुतस्तेन भवतः। चितः। चितवान्। स्तुतः। स्तु
तवान्। भिन्नः। भिन्नवान्। मृष्टः मृष्टवान्। ङितिखल्वपि। चिनुतः। चिन्वंति। मृष्टः मृजंति
गकारोप्यत्रचर्त्वभूतो निर्दिश्यते। ग्लाजिस्थश्चग्स्नुः। जिष्णुः भूष्णुः। इकइत्येव। कामयते
। जैगवायनः। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते। संक्रमो नाम गुणवृद्धिप्रतिषेधविष
यः। परिमृजंति। परिमार्जंति। परिमृजंतु। परिमार्जंतु। लघूपधगुणस्यापि प्रतिषेधः।
। अचिनवमसुनवं। अकरवं इत्यादौ लकारस्यस्थानि पिद्ङित्वेप्यसुतो ङित्वचनेत्ताकं ङि
त तिपरकार्योद्धुकारेङितिन भवतीति॥५॥ दीधीवेवीटां॥ दीधीवेव्योरिटश्चयेगुणवृद्धी
प्राप्नुतस्तेन भवतः। आदीध्यनं। आदीध्यकः। आवेव्यनं। आवेव्यकः। इटः खल्वपि। कणिक कणिकार
णिता। रणिता। इटो वृद्धिरिटोनसंभवति। लघूपधगुणस्यात्र प्रतिषेधः॥६॥ ५
५

हलोनंतराः संयोगः॥ भिन्नजातीयैरजभिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा
भवंति। समुदायः संज्ञी। जातौ चेदं बहुवचनं तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भव
वो ति। अग्निरिति गनौ। अश्व इति शवौ। कर्ण इति रणौ। इंद्र इति द्रौ मंद्र इति न दराः। उष्ट्रो रा
ष्ट्रं भ्राष्ट्र इति षट्राः। तिर्यक्त्वाव पतीति। नसतरप्यानतसतरपावा॥ हल इति किं। ति
स्प तउपत्रं। संयोगांतस्य लोप इति लोपः स्यात्। अनंतरा इति किं। पचति पनसं। स्को
घो संयोगादिति लोपः स्यात्। संयोगप्रदेशाः संयोगांतस्य लोप इत्येवमादयः॥७॥ मुखना
सिकावचनोनुनासिकः॥ मुखसहिता नासिका तया उच्चार्यते यो वर्णः सोनुनासिक
संज्ञो भवति। आङोनुनासिकश्छंदसि। अभ्र आँ अपः। गंभीरे आँ उग्रपुत्रे। च्यवनेऔ र
इंद्रः। मुखग्रहणं किं। अनुस्वारस्य वहिस्यानु। नासिकाग्रहणं किं। कचटतपानां मा भूत्
अनुनासिकप्रदेशाः। आङोनुनासिकश्छंदसि समीसे वमीरयः॥८॥ तुल्यास्य प्रयत्नं सवर्णं॥९॥

का॰ अ॰ १ पा॰ १

६ या तुल्यास्यः सु दशापर्यायः। आस्ये भवमास्यं। ताल्वादिस्थानं। प्रयतनं प्रयत्नः। स्पृष्टतादिवर्ण
गुणः। तुल्यौ आस्यप्रयत्नौ यस्य वर्णस्य येन सवर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भ
वति। चत्वार आभ्यंतराः प्रयत्नाः संज्ञोमाभ्यां ये ते। स्पृष्टता ईषत्स्पृष्टता। संवृतता। विवृत
ताचेति। अअआ इति त्रयो अकाराः। उदात्तानुदात्तस्वरिताः। प्रत्येकं सानुनासिका निरनु
नासिकाश्च। ह्रस्वदीर्घप्लुतभेदाद् द्वादशधाभिद्यंते। तथा इवर्णः। तथा उवर्णः। तथा
ऋवर्णः। लृवर्णस्य दीर्घा न संति। ते द्वादशभेदैर्मात्र चैतो संध्यक्षराणां ह्रस्वा न भवंति संति
तान्यपि द्वादशभेदानि। अंतस्थाद्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुना
सिकाश्च। रेफोष्माणां सवर्णा न संति। वर्ग्यो वर्ग्येण सवर्णः। दंडाग्रं। दध्याग्रं। आस्यग्र स्तुत्याग्रं २
हणं किं। कचटतपानां तुल्यप्रयत्नानां [illegible] माभूत्। किं च। तन्मते सुमितृत्र ऋरोऋ स्तुपाग्रं २
रिसवर्ण इति पकारस्य तकारे परे लोपस्यात्। प्रयत्नग्रहणं किं। इचुयशानां तुल्यस्थानानां
भिन्नस्थानानां २

६

होलृकारः २

[redacted]

ऋ २ १

भिन्नप्रयत्नानां माभूत्। किं च स्यात्। अंभोभ्यो तत्र ऋ ऋ रो ऋ रिसवर्ण इति ऋकारस्य ऋकारे
परतो लोपः स्यात्। ऋकार लृकारयोः सवर्णसंज्ञा वक्तव्या। होतॢकारः। उभयोः ऋवर्णस्य लृ
तिः कारस्य च अंतरतमः सवर्णो दीर्घो नास्ति। ऋकार एव दीर्घो भवति। सवर्णप्रदेशाः अकः
सवर्णे दीर्घ इत्येवमादयः। ९। नाज्झलौ। आच्च हलश्च अज्झलौ। तुल्यास्यप्रयत्नावप्यज्झ
लौ परस्परं सवर्णसंज्ञौ न भवतः। अवर्ण हकारौ। इवर्ण शकारौ। दधि शीतं। सव
र्णदीर्घत्वं न भवति। वैपाशो मत्स्यः। आनडुहं चर्म। ति॥ यस्येति चेति लोपो न भवति॥ १०॥
ईदूदेद्द्विवचनं प्रगृह्यं। ईत् ऊत् एत् इत्येवमंतं द्विवचनं प्रगृह्यसंज्ञं भवति। अग्नी इति शब्दरूपं
वायू इति। खट्वे इति। माले इति। पचेते इति। पचेथे इति। यजेते इति। ईदूदेदिति किं। वृक्षावत्र। प्ल दि
क्षावत्र। द्विवचनमिति किं। कुमार्यत्र। किशोर्यत्र। तपरकरणमसंदेहार्थं। प्रगृह्यप्रदेशाः प्लु
तप्रगृह्या अचि नित्यमित्येवमादयः। ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः। म
नामुपसंख्याने १

का॰ अ॰१पा॰१

१ णीवोष्ट्रस्य लंबेते प्रियौ वत्सतरौ मम॥ कृष्णममगो च नौ दम्पती मुनिः किं स्वत्रेदमब्रवीत्॥११॥
दंपतीव। जंपतीव। रोदसीव।११॥ अदसो मात्॥ अदसः संबंधी यो मकारस्तस्मा
स्तो त्परे ईदूदेतः प्रगृह्यसंज्ञा भवंति। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते।
। अदस एकारस्य नास्त्युदाहरणं। अदस इति किं। शम्यत्र। दाडिम्यत्र। मादिति किं। अमु
केत्र।१२। शे॥ शे इत्येतत्प्रगृह्यसंज्ञकं भवति॥ किमिदं शे इति। सुपामादेशः छन्दसि
न युष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती। युष्मे इति। अस्मे इति। त्वे रायो मे रायः। त्वे
वै इति मे इति। छांदसमेतदेकमुदाहरणं। अस्मे इंद्राबृहस्पती इति। तत्र तथा पाठा
त्। इह तु लौकिकमनुकरणं। युष्मे इति अस्मे इति। त्वे इति मे इति।१३। निपात ए
काजनाङ्॥१४॥ एकश्चासावच्च एकाच्। निपातो य एकाजाङ्वर्जितः स प्रगृह्यसंज्ञो
भवति। अ अपेहि। इ इंद्रं पश्य। उ उदकं। आ एवं नु मन्यसे। आ एवं किल तत्। निपा १

त इति किं। चकारात्र। एकाजिति किं। प्राग्नये वाचमीरय। अनाङिति किं। आ उदकांतात्
ओदकांतात्। प्रियं पांथमनुव्रजेत्। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः॥ एतमातं ङि
तं विद्याद्वाक्यस्मरणयोरङित्॥ ओत्॥ निपात इति वर्तते। तस्यौकारेणांतदेनविधिः
। ओदंतो यो निपातः स प्रगृह्यसंज्ञो भवति। आहो इति। उताहो इति।१५। संबुद्धौ शाकल्य
स्येतावनार्षे॥ ओदिति वर्तते। संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य
मतेन प्रगृह्यसंज्ञो भवति। इतिशब्दे अनार्षे। अवैदिके परतः। वायो इति। वाय्विति। भा
नो इति। भानविति। संबुद्धाविति किं। गवित्ययमाह। अत्रानुकार्यानुकरणयोर्भेदस्य ङ्गा बित्पाह
विवक्षितत्वादसत्यर्थवत्त्वे प्रातिपदिकत्वाभावात् विभक्तिर्न भवति। शाकल्यस्यग्रह
णं विभाषार्थं। इताविति किं। पटो अत्र। अनार्ष इति किं। एता गा ब्रह्मबंधव इत्यब्रवीत्।१६।
उञः॥ ऊँ॥ शाकल्यस्येताविति वर्तते। उञः प्रगृह्यसंज्ञो भवति। इतौ। शाकल्यस्याचार्यस्य
उञः स्थाने इतावनार्षे परतः शाकल्यस्याचार्यस्य मतेन। १

का॰ अ॰ १।१।१ मतेन शाकल्यस्येति विभाषार्थं । उञ इति । विति ॐ । ऊँ उञ इति वर्तते । ऊँ इत्ययमादेशो भवति । उञः दी
८ का॰ र्घोनुनासिकः । प्रगृह्यसंज्ञकश्च । शाकल्यस्य ग्रहणं विकल्पार्थमिहाप्यनुवर्तते । तेन त्रीणि रूपाणि भ
वंति । ऊँ इति । उ इति । विति । १६ । ईदूतौ च सप्तम्यर्थे । शाकल्यस्येति निवृत्तं । ईदंतमूदंतं च श
ब्दरूपं सप्तम्यर्थे वर्तमानं प्रगृह्यसंज्ञं भवति । अध्यस्यां मामकी तनू । मामकायां तन्वामिति । मामे
गोप्यौ मामकीं मामकी इति तन्वां तनू इति । सोमो गौरी अधिश्रितः । ईदूताविति किं । प्रियः सूर्ये प्रियो
अग्ना भवति । अग्निशब्दात्परस्याः सप्तम्या डादेशः । सप्तमीग्रहणं किं । धी । गौमती । स्नुहुती । धी त्या ति इति ६
मत्या । स्नुहुत्या इति प्राप्ते पूर्वसवर्णः । अर्थग्रहणं किं । वाप्यामश्वो इति विग्रहः । वाप्यश्वः न
द्याम्निः । तपरकरणं असंदेहार्थं । ईदूतौ सप्तमीत्येव लुप्तेर्थग्रहणाद्भवेत् । पूर्वस्य तु सवर्णे
सावा उं भावः प्रसज्यते । न च नु । घ्वन्तद्दीर्घत्वं तत्रापि सरसीयादि । ज्ञापकस्यान्तरं तत्वेमावा पूर्व
पदस्य भूत । १८ । दाधा घ्वदाप् । दारूपाश्चत्वारो धातवः धारूपौ च द्वौ । घुसंज्ञका भवंति । दा ८
प्दैपौ वर्जयित्वा । दुदाञ् । प्रणिददाति । दाण् । प्रणिदाता । दोः प्रति घति । देङ् प्रणिदय
ते १

नेर्गदनद

ते
ति । डुधाञ् । प्रणिदधाति । धेट् । प्रणिधयति । वत्सो मातरं । अदाबिति किं । दाप् लवने । दातं बर्हिः ।
दैप् शोधने । अवदातं मुखं । घुप्रदेशाः । घुमास्था गापा जहाति सां हलि । इत्येवमादयः । १९ । आद्यंतव
स देकस्मिन् । २० । [illegible] यस्याद्यंतोपदिष्टानि कार्याणि न सिध्यंति तत्प्रमतिदेश आरभ्यते । सप्तम्यर्थे
वतिः । आद्यविक्र त इव एकस्मिन्नपि कार्यं भवति । यथा कर्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति
। एवमौपगवमित्यत्रापि यथा स्यात् । यथा वृक्षाभ्यां इत्यत्रांगांते दीर्घत्वं भवति । एवमाभ्यामित्य
त्रापि यथा स्यात् । एकस्मिन्निति किं । सभासंनयने भवः सभासंनयनः । आकारमात्र प्रित्य
।२०। हृदुसंज्ञा न भवति । तरप्तमपौ घः । तरप् । तमप् । इत्येतौ प्रत्ययौ घसंज्ञौ भवतः । कुमारितरा । कु
मारितमा । ब्राह्मणितरा । ब्राह्मणितमा । घरूपप्रदेशाः । घरूपकल्पचेलड्ब्रुव गोत्रमतहते
षु ड्यो नेकाचो ह्रस्वः इत्येवमादयः । २१ । बहुगणवतुडति संख्या । बहु । गण । वतु । डति । इत्येते सं
ख्यासंज्ञा भवंति । बहुकृत्वः । बहुधा । बहुकः । बहुशः । गण । गणकृत्वः । गणधा । गणकः । ग
णशः । वतु । तावत्कृत्वः । तावद्धा । तावत्कः । तावच्छः । डति । कति । कृत्वः । कतिधा । कतिकः । क

संख्याया अतिशदंता पाः कन् ३-२ भूर्या१

का-आ।पा-१

९ तिशः। बहुगणशब्द योर्वैपुल्ये संघे च वर्त्तमानयोरिह ग्रहणं नास्ति। संख्या वाचिनोरेव। भूर्यादी

नां निवृत्त्यर्थं संख्या संज्ञा विधीयते। अर्द्धपूर्वपदश्च पूरण प्रत्ययांतः संख्या संज्ञो भवतीति वक्त

व्यं। समासकन् विध्यर्थं। अर्द्धपंचमसूर्पैः। अर्द्धपंचमकः। संख्याप्रदेशाः संख्या वंशपेनेत्येवमा

दयः। २४। ष्णांता षट्। स्त्रिलिंग निर्देशात्संख्येति संबध्यते। षकारांता नकारांता च या संख्या सा

षट् संज्ञा भवति षकारांता तावत्। षट्। तिष्ठति। षट् पश्य। नकारांतां। पंच। सप्त। नव। दश। अ

तर्ग्रहणं किं। औपदेशिकार्थं। तेनेह न भवति। शतानि सहस्राणि। अष्टानांइत्यत्र नु इत्येव ति

२५ षड्प्रदेशाः। षुड्भ्योलुग्जिस्वेवमादयः। डतिचौ। त्यं तापा संख्या सा षट् संज्ञा भवति। कतिति

ष्ठंति। कतिपश्य। क्तक्तवत्तू निष्ठा। क्तप्रत्ययः क्तवतुप्रत्ययश्च क्तवतूप्रत्ययौ निष्ठा संज्ञौ भवतः। कृतः

। कृतवान्। भुक्तं। भुक्तवान्। ककारः किदर्थः। उकार उगित्कार्यार्थः। निष्ठाप्रदेशाः श्वी

२२ दितोनिष्ठायां इत्येवमादयः। सर्वादीनि सर्वनामानि। सर्वशब्द आदिर्येषां तानि इमानि सर्वा

दीनि सर्वनामसंज्ञानि भवंति। सर्वः। सर्वौ। सर्वे। सर्वस्मै। सर्वस्मात्। सर्वेषां। सर्वस्मिन्। सर्वकः। एवं ९

४ प्रयोजनं सर्वनाम्नस्तृतीया च ति। उभयशब्दस्य उभयस्मै उभयस्मात्। उभयस्मिन्

प्रथम चरम तय अल्पार्ध कतिपय। उभशब्दस्य सर्वनामत्वे प्रयोजनं

उभस्मिन् १

विश्व। विश्वौ। विश्वे। विश्वस्मै। विश्वस्मात्। विश्वेषां। विश्वस्मिन्। विश्वकः। उभयेषां। डतर। डतम।

कतर। कतम। कतरस्मै। कतमस्मै। इतर। अन्य। अन्यतर। इतरस्मै। अन्यस्मै। अन्यतरस्मै।

त्वशब्दोयमन्यवाची। स्वरभेदात् द्विः पठितः। एकोत्र उदात्तः। केचित्तकारांतमेकं पठंति त्व। त्वदिति द्वितीयोऽनु

। त्वपि वानुदात्ता विति स्मरंति। नेम। नेमस्मै। वक्ष्यमाणेन जसि भवति। नेमे नेमाः। समे। सम दात्तः २

स्मै। कथं यथासंख्यमनुदेशः समानां। समेदेशे पजे तेति। समस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञे

विभाषा ४

ष्यते। न तु विभाषा सर्वत्र सिम। सिमस्मै। । पूर्व पराऽवर दक्षिणोत्तर पराधराणि व्यवस्थायामसंज्ञायां। स्वम ज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंख्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। एक। द्वि। युष्म द्। अस्मद्। भवत्। किम्। सर्वादि। सर्वनाम प्रदेशाः। सर्वनाम्नः स्मै इत्येवमादयः। ॥ विभाषा दिक्समासे बहुव्रीहौ। न बहुव्रीहाविति प्रतिषेधं वक्ष्यति। तस्मिन्नित्ते प्रतिषेधे प्राप्ते विभाषेयमारभ्यते॥ दिशां समासो दिक्समासः। दिगुपदिष्टसमासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनाम संज्ञानि भवंति। उत्तर पूर्वस्मै। उत्तर पू